श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्री रङ्गनाथदिव्यमणिपादुकाभ्यां नमः

श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु
श्रीरङ्गनाथपादुकासहस्रे

॥ प्रभावपद्धतिः तृतीया ॥

This document has been prepared by

Sunder Kidāmbi

with the blessings of

श्री रङ्गरामानुज महादेशिकन्

His Holiness śrīmad āṇḍavan śrīraṅgam

श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्री रङ्गनाथदिव्यमणिपादुकाभ्यां नमः

॥ प्रभावपद्धतिः तृतीया ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

वन्दे तद् रङ्गनाथस्य मान्यं पादुकयोर्युगम्।
उन्नतानामवनतिः नतानां यत्र चोन्नतिः ॥ **3.1** ॥

निश्शेषमम्बरतलं यदि पत्रिका स्यात्
सप्तार्णवी यदि समेत्य मषी भवित्री।
वक्ता सहस्रवदनः पुरुषः स्वयं चेत्
लिख्येत रङ्गपतिपादुकयोः प्रभावः ॥ **3.2** ॥

वेदोपबृंहणकुतूहलिना निबद्धं
विश्वम्भराश्रुतिभवेन महर्षिणा यत्।
व्यासेन यच्च मधुसूदनपादरक्षे !
द्वे चक्षुषी त्वदनुभावमवेक्षितुं नः ॥ **3.3** ॥

प्रत्यक्षयन्ति परिशुद्धधियो यथावत्
रामायणे रघुपुरन्दरपादरक्षे !।
शश्वत् प्रपञ्चितमिदम्परयैव वृत्त्या
सङ्क्षेपविस्तरदशासु तवानुभावम् ॥ **3.4** ॥

अल्पश्रुतैरपि जनैरनुमीयसे त्वं
रङ्गेशपादु ! नियतं निगमोपगीता।

सारं तदर्थमुपबृंहयितुं प्रणीतं
    रामायणं तव महिम्नि यतः प्रमाणम्॥ **3.5** ॥

तिष्ठन्तु श्रुतयस्ततोऽपि महितं जागर्ति तत् पादुके !
    तत्तादृक्प्रथनाय तावकगुणग्रामाय रामायणम्।
यस्यासीदरविन्दसम्भववधूमञ्जीरशिञ्जारव -
    स्पर्धादुर्धरपादबद्धफणितिर्वल्मीकजन्मा कविः॥ **3.6** ॥

भक्तिप्रह्वपुरप्रभञ्जनजटावाटीसनीडस्फुरत्
    चूडारग्वधवासनापरिमळस्त्याने स्तुमः पादुके।
रङ्गक्षोणिभृदङ्घ्रिपद्मयुगळीपूर्णप्रपत्तेः फलं
    निश्चिन्वन्ति विपश्चितः शमधना नित्यं यदुत्तंसनम्॥ **3.7** ॥

मातर्माधवपादुके ! तव गुणान् कः स्तोतुमस्तोकधीः
    कोटीरेषु यदर्पणप्रणयिनां सेवाक्षणे स्वर्गिणाम्।
अन्योन्यं क्षिपतामहंप्रथमिकासम्मर्दकोलाहलं
    विष्वक्सेनविहारवेत्रलतिकाकम्पश्चिराल्लुम्पति॥ **3.8** ॥

योषिद्भूतदृषन्त्यपोढशकटस्थेमानि वैमानिक -
    स्रोतस्विन्युपलम्भनानि भसितोदञ्चत्परीक्षिन्ति च।
दूत्यादिष्वपि दुर्वचानि पदयोः कृत्यानि मत्वेव यत्
    धत्ते तत्प्रणयं तदेव चरणत्राणं वृणे रङ्गिणः॥ **3.9** ॥

वन्दे तन्मधुकैटभारिपदयोर्मित्रं पदत्रद्वयं
    यत्तद् भक्तिभरानतेन शिरसा यत्र क्वचित् बिभ्रति।
द्वित्रब्रह्मविनाडिकावधिपदव्यत्यासशङ्काभर -
    त्रासोत्कम्पदशाविसंस्थुळधृतिस्त्रैविष्टपानां गणः॥ **3.10** ॥

पद्माकान्तपदान्तरङ्गविभवोद्रिक्तं पदत्रं भजे
    यद् भक्त्या नमतां त्रिविष्टपसतां चूडापदेष्वर्पितम्।
नित्यापीतनखेन्दुदीधितिसुधासन्दोहमुच्चैर्वम -
    त्यन्तर्नूनममान्तमन्तिकलसच्छेषापटच्छद्मना॥ **3.11** ॥

तद्विष्णोः परमं पदत्रयुगळं त्रय्यन्तपर्यन्तगं
    चिन्तातीतविभूतिकं वितरतु श्रेयांसि भूयांसि नः।
यद्विक्रान्तिदशासमुत्थितपदप्रस्यन्दिपाथस्विनी -
    सख्येनेव सदा नतस्य तनुते मौळौ स्थितिं शूलिनः॥ **3.12** ॥

अम्बुन्यम्बुनिधेरनन्यगतिभिर्मीनैः कियद् गम्यते
    क्लेशेनापि कियद् व्यलङ्घि रभसोत्तुङ्गैः प्लवङ्गेश्वरैः।
विज्ञाता कियती पुनः क्षितिभृता मन्थेन गम्भीरता
    किं तैः केशवपादुकागुणमहाम्भोधेस्तटस्था वयम्॥ **3.13** ॥

पदकमलरजोभिर्वासिते रङ्गभर्तुः
    परिचितनिगमान्ते पादुके धारयन्तः।
अविदितपरिपाकं चन्द्रमुत्तंसयन्ते
    परिणतभुवनं तत् पद्ममध्यासते वा॥ **3.14** ॥

सकृदपि किल मूर्ध्ना शार्ङ्गिणः पादुके ! त्वां
    मनुजमनुवहन्तं देहबन्धव्यपाये।
उपचरति यथार्हं देववर्गस्त्वदीयः
    स तु नियमितभृत्यो जोषमास्ते कृतान्तः॥ **3.15** ॥

पदसरसिजमेतत् पादुके ! रङ्गभर्तुः
    प्रतिनिधिपदवीं ते गाहते स्वेन भूम्ना।
तदिदमपरधा चेत् तिष्ठतस्तस्य नित्यं
    कथमिव विदितार्थास्त्वां भजन्ते महान्तः॥ **3.16** ॥

श्रुतिशिरसि निगूढं कर्मणां चोदितानां
त्वदवधि विनिवेशं नाधिगन्तुं क्षमाणाम्।
परिहसति मुरारेः पादुके ! बालिशानां
पशुवधपरिशेषान् पण्डितो नामयज्ञान्॥ 3.17॥

जनयितुमलमर्घ्यं दैत्यजित्पादरक्षे !
नमति महति देवे नाकसिन्धोर्विशीर्णाः।
मुहुरहिपतिचूडामौळिरत्नाभिघातात्
परिणतलघिमानः पाथसामूर्मयस्ते॥ 3.18॥

पदसरसिजयोस्त्वं पादुके ! रङ्गभर्तुः
मनसि मुनिजनानां मौळिदेशे श्रुतीनाम्।
वचसि च सुकवीनां वर्तसे नित्यमेका
तदिदमवगतं ते शाश्वतं वैश्वरूप्यम्॥ 3.19॥

परिसरविनतानां मूर्ध्नि दुर्वर्णपङ्क्तिं
परिणमयसि शौरेः पादुके ! त्वं सुवर्णम्।
कुहकजनविदूरे सत्पथे लब्धवृत्तेः
क्व नु खलु विदितस्ते कोऽप्यसौ धातुवादः॥ 3.20॥

बलिमथनविहाराद्वर्धमानस्य विष्णोः
अखिलमतिपतद्भिर्विक्रमैरप्रमेयः।
अवधिमनधिगच्छन् पापराशिर्मदीयः
समजनि पदरक्षे ! सावधिस्त्वन्महिम्ना॥ 3.21॥

तटभुवि यमुनायास्तस्थुषी यन्निवेशात्
वहति निगमशाखावैभवं नीपशाखा।
पदकमलमिदं तत् पादुके ! रङ्गभर्तुः
त्वयि भजति विभूतिं पश्य शाखानुशाखाम्॥ 3.22॥

शिरसि विनिहितायां भक्तिनम्रे भवत्यां
    सपदि तनुभृतस्तामुन्नतिं प्राप्नुवन्ति।
मधुरिपुपदरक्षे ! यद्वशेनैव तेषाम्
    अनितरसुलभं तद्धाम हस्तापचेयम्॥ **3.23** ॥

सकृदपि भुवनेऽस्मिन् शार्ङ्गिणः पादुके ! त्वाम्
    उपनिषदनुकल्पैरुत्तमाङ्गैर्दधानाः।
नरकमिव महान्तो नाकमुल्लङ्घयन्तः
    परिषदि निविशन्ते प्राक्तनानां गुरूणाम्॥ **3.24** ॥

शमदमगुणदान्तोदन्तवैदेशिकानां
    शरणमशरणानां मादृशां माधवस्य।
पदकमलमिदं ते पादुके ! रक्ष्यमासीत्
    अनुदयनिधनानामागमानां निधानम्॥ **3.25** ॥

परिचितपदपद्मां पादुके ! रङ्गिणस्त्वां
    त्रिभुवनमहनीयां सादरं धारयन्तः।
निजशिरसि निलीनं देवि ! मन्दारमाल्यं
    निगमपरिमळैस्ते वासयन्तीव देवाः॥ **3.26** ॥

कनकसरिदनूपे कल्पवृक्षस्य भूष्णोः
    पदकिसलयलग्ना पादुके ! मञ्जरी त्वम्।
परिणतिमधुराणां या फलानां सवित्री
    वहसि निगमबृन्दैः सम्पदं षट्पदानाम्॥ **3.27** ॥

परिकलयसि चेन्मां पद्मवासानिषेव्ये
    पदकमलयुगे त्वं पादुके ! रङ्गभर्तुः।
अविदितनिगमानां नूनमस्मादृशानाम्
    अघटितघटनी ते शक्तिराविष्कृता स्यात्॥ **3.28** ॥

श्रुतिशतशिरश्चूडापीडे निपीडयितुं क्षमे
दुरितसरितामोघानेतानमोघविसर्पिणः।
क्रमपरिणमद्वेधः श्रेणीशिखामणिघट्टना
मसृणिततले रङ्गक्षोणीभृतो मणिपादुके॥ 3.29॥

जगज्जननरक्षणक्षपणसङ्गिनो रङ्गिणः
पवित्रतममाद्रिये भगवतः पदत्रद्वयम्।
शिवत्वकरणक्षमत्रिदिवसिन्धुसम्बन्धिनं
प्रधाव्य चरणं निजं प्रणिदधाति यत्र प्रभुः॥ 3.30॥

यदध्वरभुजां शिरः पदयुगं च रङ्गेशितुः
दृढं घटयितुं क्षमं भवति शेषशेषित्वतः।
शिरस्त्रमिदमस्तु मे दुरितसिन्धुमुष्टिन्धयम्
कदध्वविहतिक्षमं किमपि तत् पदत्रद्वयम्॥ 3.31॥

समुत्क्षिपति चेतसि स्थिरनिवेशिता तावकी
मुकुन्दमणिपादुके! मुहुरुपासनावासना।
उदर्कपरिकर्कशानुपरिपर्वणा खर्वितान्
अनर्थशतगर्भितानमरशम्भळीविभ्रमान्॥ 3.32॥

विगाहन्ते रङ्गक्षितिपतिपदत्रायिणि! सकृत्
वहन्तस्त्वामन्तर्विनिहितकुचेलव्यतिकराः।
मदोद्दामस्तम्बेरमकरटनिर्यन्मधुझरी
परीवाहप्रेङ्खद्भ्रमरमुखरामङ्गणभुवम्॥ 3.33॥

अधिदैवतमापतत्सु कल्पेष्वधिकारं भजतां पितामहानाम्।
अभिरक्षतु रङ्गभर्तुरेषा करुणा काचन पादुकामयी नः॥ 3.34॥

ध्रुवमिन्द्रियनागशृङ्खला वा
निरयद्वारनिवारणार्गळा वा।

अनपायपदाधिरोहिणी वा
    मम रङ्गेशविहारपादुके ! त्वम् ॥ 3.35 ॥

शरणागतसार्थवाहशीलां
    श्रुतिसीमन्तपदप्रसाधनार्हाम् ।
अधिरङ्गमुपास्महे मुरारेः
    महनीयां तपनीयपादुके ! त्वाम् ॥ 3.36 ॥

इह ये भवतीं भजन्ति भक्त्या
    कृतिनः केशवपादुके ! नियुक्ताः ।
कथयाम्ब तिरोहितं तृतीयं
    नयनं त्रीणि मुखानि वा किमेषाम् ॥ 3.37 ॥

मधुवैरिपरिग्रहेषु नित्यं
    क्षमया त्वं मणिपादुके ! समेता ।
तदपि क्षमसे न किं परेषां
    त्रिदशाधीश्वरशेखरे निवेशम् ॥ 3.38 ॥

द्वितयं प्रतियन्ति रङ्गभर्तुः
    कतिचित् काञ्चनपादुके ! शरण्यम् ।
अभयान्वितमग्रिमं करं वा
    भवतीशेखरितं पदाम्बुजं वा ॥ 3.39 ॥

भरताश्वसनेषु पादशब्दं
    वसुधाश्रोत्रसमुद्भवो मुनीन्द्रः ।
पठति त्वयि पादुके ! ततस्त्वं
    नियतं रामपदादभिन्नभूमा ॥ 3.40 ॥

मकुटेषु निविश्य दिक्पतीनां
    पदमेव प्रतिपद्य दैत्यहन्तुः ।

परिरक्षसि पादुके ! पदं त्वं
    क्व नु भिद्येत गरीयसां प्रभावः ॥ 3.41 ॥

जगतामभिरक्षणे त्रयाणाम्
    अधिकारं मणिपादुके ! वहन्त्योः।
युवयोः परिकर्मकोटिलग्नं
    चरणद्वन्द्वमवैमि रङ्गभर्तुः ॥ 3.42 ॥

पदरक्षिणि ! वत्सला निकामं
    रघुवीरस्य पदाम्बुजादपि त्वम्।
यदसौ भरतस्त्वयांशवत्त्वात्
    न पुनस्तादृशमन्वभूद्वियोगम् ॥ 3.43 ॥

अभिगम्य मुकुन्दपादुके ! त्वाम्
    अपनीतातपवारणैः शिरोभिः।
हरितां पतयो दुरापमन्यैः
    अनघच्छायमवाप्नुवन्ति भोगम् ॥ 3.44 ॥

अपहाय सितासितानुपायान्
    अरविन्देक्षणपादुके ! महान्तः।
त्वदनन्यतया भजन्ति वृत्तिं
    त्वदसाधारणभोगसाभिलाषाः ॥ 3.45 ॥

प्रणमन्ति न वा विधेर्विपाकात्
    य इमे रङ्गनरेन्द्रपादुके ! त्वाम्।
उपजातमनुत्तमाङ्गमेषाम्
    उभयेषामपि चित्रमुत्तमाङ्गम् ॥ 3.46 ॥

तव केशवपादुके ! प्रभावो
    मम दुष्कर्म च नन्वनन्तसारे।

नियमेन तथाऽपि पश्चिमस्य
　　प्रथमेनैव पराभवं प्रतीमः ॥ **3.47** ॥

अस्त्रभूषणतयैव केवलं
　　विश्वमेतदखिलं बिभर्ति यः।
अक्रमेण मणिपादुके ! त्वया
　　सोऽपि शेखरतयैव धार्यते ॥ **3.48** ॥

रामपादसहधर्मचारिणीं
　　पादुके ! निखिलपातकच्छिदम्।
त्वामशेषजगतामधीश्वरीं
　　भावयामि भरताधिदेवताम् ॥ **3.49** ॥

चूडाकपालव्यतिषङ्गदोषं
　　विमोचयिष्यन्निव विष्णुपद्याः।
कृतादरः केशवपादरक्षे !
　　बिभर्ति बालेन्दुविभूषणस्त्वाम् ॥ **3.50** ॥

त्वयैव नित्यं मणिपादरक्षे !
　　राजन्वती सृष्टिरियं प्रजानाम्।
स्त्रीराज्यदोषप्रशमाय नूनं
　　निर्दिश्यसे नाथविशेषणेन ॥ **3.51** ॥

बिभर्षि नित्यं मणिपादुके ! त्वं
　　विश्वम्भरं धाम निजेन भूम्ना।
तवानुभावश्चुळकीकृतोऽयं
　　भक्तैरजस्रं भवतीं दधानैः ॥ **3.52** ॥

परस्य पुंसः पदसन्निकर्षे
　　तुल्याधिकारां मणिपादुके ! त्वाम्।

उत्तंसयन्ति स्वयमुत्तमाङ्गैः
  शेषासमं शेषगरुत्मदाद्याः ॥ 3.53 ॥

मुकुन्दपादाम्बुजधारिणि ! त्वां
  मोहादनुत्तंसयतां जनानाम्।
मूर्ध्नि स्थिता दुर्लिपयो भवन्ति
  प्रशस्तवर्णावळयस्तदीयाः ॥ 3.54 ॥

भूमिः श्रुतीनां भुवनस्य धात्री
  गुणैरनन्ता विपुला विभूत्या।
स्थिरा स्वयं पालयितुं क्षमा नः
  सर्वंसहा शौरिपदावनि ! त्वम् ॥ 3.55 ॥

स्थैर्यं कुलक्षोणिभृतां विधत्से
  शेषादयस्त्वां शिरसा वहन्ति।
पदप्रसूता परमस्य पुंसः
  पृथ्वी महिम्ना मणिपादुके ! त्वम् ॥ 3.56 ॥

दैत्याधिपानां बलिनां किरीटा
  निक्षेपणं ते यदि नाभ्यनन्दन्।
रङ्गेशपादावनि ! रङ्गधाम्नः
  सोपानतां प्राप्य वहन्त्यमी त्वाम् ॥ 3.57 ॥

शेषो गरुत्मान् मणिपादपीठी
  त्वं चेति पादावनि ! विश्वमान्याः।
तुल्याधिकारा यदि किन्नु सन्तः
  त्वामेव नित्यं शिरसा वहन्ति ॥ 3.58 ॥

परस्य पुंसः परमं पदं तत्
  बिभर्षि नित्यं मणिपादुके ! त्वम्।

अन्यादृशां व्योमसदां पदानि
    त्वय्यायतन्ते यदिदं न चित्रम् ॥ **3.59** ॥

पादौ मुरारेः शरणं प्रजानां
    तयोस्तदेवासि पदावनि ! त्वम्।
शरण्यतायास्त्वमनन्यरक्षा
    सन्दृश्यसे विश्रमभूमिरेका ॥ **3.60** ॥

अन्येषु पद्माकमलासनाद्यैः
    अङ्गेषु रङ्गाधिपतेः श्रितेषु।
पदावनि ! त्वामधिगम्य जातं
    पदं मुरारेरधिदैवतं नः ॥ **3.61** ॥

क्षणं सरोजेक्षणपादुके ! यः
    कृतादरः किङ्कुरुते भवत्याः।
अकिञ्चनस्यापि भवन्ति शीघ्रं
    भ्रूकिङ्करास्तस्य पुरन्दराद्याः ॥ **3.62** ॥

वहन्ति ये माधवपादुके ! त्वाम्
    उह्यन्त एते दिवि निर्विघाताः।
हंसेन नित्यं शरदभ्रभासा
    कैलासगौरेण ककुद्मता वा ॥ **3.63** ॥

रुद्रं श्रितो देवगणः स रुद्रः
    पद्मासनं सोऽपि च पद्मनाभम्।
स त्वामनन्तो न पुनस्त्वमन्यं
    क एष पादावनि ! ते प्रभावः ॥ **3.64** ॥

परस्य धाम्नः प्रतिपादनार्हां
    वदन्ति विद्यां मणिपादुके ! त्वाम्।

यतस्तवैवाधिगमे प्रजानां
दूरीभवत्युत्तरपूर्वमंहः ॥ **3.65** ॥

धन्या मुकुन्दस्य पदानुषङ्गात्
धनीयता येन समर्चिता त्वम्।
वासस्तदीयो मणिपादरक्षे !
लक्ष्म्याऽळकामप्यधरीकरोति ॥ **3.66** ॥

पदेन विष्णोः किमुतेतरेषां
विसृज्य सङ्गं समुपासते त्वाम्।
करोषि तान् किं त्वमपेतकामान्
कालेन पादावनि ! सत्यकामान् ॥ **3.67** ॥

अभ्यासयोगेन निगृह्यमाणैः
अन्तर्मुखैरात्मविदो मनोभिः।
मातस्त्वया गुप्तपदं प्रभावात्
अन्वेषयन्त्यागमिकं निधानम् ॥ **3.68** ॥

मूर्ध्ना दधानां मणिपादुके ! त्वाम् उत्तंसितं वा पुरुषं भवत्या।
वदन्ति केचित् वयमामनामः त्वामेव साक्षादधिदैवतं नः ॥ **3.69** ॥

मूर्ध्ना सतामधस्तात् उपरि च विष्णोः पदेन सङ्घटिताम्।
अदवीयसीं विमुक्तेः पदवीमवयन्ति पादुके ! भवतीम् ॥ **3.70** ॥

॥ इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु
श्रीरङ्गनाथपादुकासहस्रे प्रभावपद्धतिः तृतीया ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥